# संस्कृत-वार्ता:

**दिनाङ्क :- 27.03.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**लोकसभा नामाङ्कन**

अद्य लोकसभानिर्वाचनस्य प्रथमचरणस्य नामाङ्कनाय अन्तिमः दिवसः अस्ति। बिहार राज्ये नामांकनस्य अन्तिमा तिथिः गुरुवासरं अस्ति। अस्मिन् चरणे एप्रिलमासस्य ऊनविंशति दिनाङ्के सप्तदश राज्येषु चतुर्षु च केन्द्रशासितप्रदेशेषु द्वयाधिकैकशतं लोकसभासनेषु निर्वाचनं भविष्यति। तमिलनाडु, अरुणाचलप्रदेश, मेघालय, मिजोरम, नागालैण्ड्, सिक्किम, लक्षद्वीप, पुडुचेरी राज्येषु प्रथमचरणस्य एकस्मिन् चरणे मतदानं भविष्यति। नामाङ्कन पत्राणां निरीक्षणं अस्य मासस्य अष्टविंशति दिनाङ्के भविष्यति, अभ्यार्थित्वं प्रत्यावर्तनाय अन्तिमातिथिः च मार्चमासस्य त्रिंशत् दिनाङ्कम् अस्ति। बिहारे नामाङ्कनानां निरीक्षणं अस्य मासस्य त्रिंशत् दिनाङ्के भविष्यति, अभ्यार्थित्वं प्रत्यावर्तनाय अन्तिमातिथिः आगामिमासस्य द्वितीयदिनाङ्कः अस्ति। बिहारे अस्य चरणस्य मतदानं एप्रिलमासस्य ऊनविंशति दिनाङ्के भविष्यति। विभिन्नेषु राज्येषु केन्द्रशसित प्रदेशेषु च ऊननवति लोकसभासनानां कृते द्वितीयचरणस्य अधिसूचना गुरुवासरे **आगमिष्यति।**

**भाजपा-लोकसभा प्रत्याशी :**

भाजपेति दलेन आगामी लोकसभानिर्वाचनाय त्रयः अभ्यर्थिनः नामानि घोषिता। दलेन दौसातः कन्हैयालालमीना, राजस्थानस्य करौली-ढोलपुरलोकसभासनात् इन्दुदेवीजाटवः च नाम्नी उद्घोषिता। थुनाओजम बसन्त कुमार सिंह: आन्तरिक मणिपुर संसदीय निर्वाचन क्षेत्रात् भाजपा दलस्य प्रत्याशी भविष्यति। ततः पूर्वं ह्यः सिक्किमनगरे विधानसभानिर्वाचनाय नवप्रत्याशिनां द्वितीयासूची दलेन प्रकाशिता आसीत्।

-

**जयशंकर-फलीपीन्स**

विदेशमन्त्री डॉ.एस्. जयशंकर: प्रोदीरितवान् यत् स्वकीय-राष्ट्रियसम्प्रभुतां यथावदेव स्थापयितुं फिलीपींसदेशस्य प्रयासानां भारतं समर्थनं विदधाति। मनीलानगरे ह्य: फिलीपींसदेशस्य विदेशमन्त्रिणा एनरिक-मेनालो इत्यनेन सह वार्ताहरान् सम्बोधन् डॉ.जयशंकर: सूचितवान् यत् प्रत्येकं देशस्य समीपे तस्य राष्ट्रिय-सम्प्रभुतां तदवदेव स्थापयितुम् अपि च क्रियान्वयनस्य अधिकारो वर्तते। ध्यातव्यं वर्तते यत् विदेशमन्त्रिण: वक्तव्यमिदं दक्षिणीय-चीन-सागरे चीनदेशेन सह फिलीपींसइत्येतस्य सागरीय-विवादस्य अनन्तरं प्रकाशे आगतम्। डॉ.जशंकर: सबलं प्रत्यपादयत् यत् भारतं आसियान-देशानां केन्द्रीयकरणं समन्वयनं ऐक्यभावश्च इत्येतेषां समर्थको वर्तते। विदेशीमन्त्री अग्रे उक्तवान् यत् भारतं नियमाधारित-शासनस्य कठोरानुपालनात् अस्मिन् क्षेत्रस्य सुदृढप्रगतौ समृद्धौ च विश्वासं वर्तते, एतस्मिन् प्रकरणे सागरीय-संविधानस्य अन्तर्गतं मान्यताप्राप्तस्य सागरीय-विधीनां सम्बन्धे संयुक्तराष्ट्रस्य द्वयशीत्यधिक-नवदशतमस्य यू.एम्.सी.एल्.ओ.एस्. इत्येतस्य घोषणाया: विशेषमहत्वं विद्यते। सम्पूर्णतया सह अस्य नियमस्य पालनं भवेत्।

-

**आईपीएल**

आईपीएल क्रिकेट्-क्रीडायां ह्य: चेन्नईनगरस्य एम.ए. चिदम्बरम-क्रीडाङ्गणे चेन्नई सुपरकिंग्स-दलेन गुजरात-टाइटन्स-इत्येतं दलं त्रिषष्ठी धावनांकै: पराजितम्। तत्रैव अस्मिन् क्रिकेटमालिका-स्पर्धायां अद्य सनराइजर्स हैदराबाद-मुम्बई इंडियन्स इत्येतयो: दलयो: मध्ये हैदराबादनगरस्य राजीव-गांधी-अंताराष्ट्रिय-क्रीडांगणे सायं सार्धसप्तवादने स्पर्धा भविष्यति।

**।। इति वार्ता: ।।**